
REET 2025
LEVEL-1&2
ROJGAR With ANKIT
वंदन बैच
संस्कृत
भाषा शिक्षण विधियाँ
LIVE
13-02-2025 03:00 PM

## "संस्कृत भाषा-शिक्षण-विधयः" (भाषा प्रथम व भाषा द्वितीय दोनों के लिए)

30
↓
20 + 10
↓ ↓
व्याकरण शिक्षण शास्त्र

संस्कृत शिक्षा प्राचीनकालात् प्रचलति। अतः प्राचीनकालात् वर्तमानकाले संस्कृतशिक्षणस्य अतीव महत्वं वर्तते। संस्कृत शिक्षणं केन-केन विधिना प्राचीनकाले प्रदीयते स्म? आधुनिक काले शिक्षणमिदं कथं प्रचलति ? कथं प्रचाल्येत, एतेषां प्रश्नानां समाधानाय संस्कृत शिक्षणस्य विधयः त्रिषु भागेषु विभक्तुं शक्यते-

1. प्राचीन विधिः → पाठशाला विधि → मौखिक
2. नवीन विधिः
3. नवीनतम विधिः

**पाठशाला विधिः-** अयं संस्कृत शिक्षणस्य प्राचीनतमः विधिरस्ति । परम्परागतरूपेण आश्रीयमानत्वादयं पारम्परिक विधिरत्यप्युच्यते। पण्डितानां निर्माणाय पण्डितैरादृतत्वात् पण्डित प्रणाली इति चैषा कथ्यते। सप्तदशशताब्दीपर्यन्तं पाठशालसु, आश्रमेषु, गुरुकुलेषु, मठेषु, विद्या-पीठेषु च अयं शिक्षाविधिः प्रचलने आसीत्। शनै-शनै लॉर्डमैकाले महोदयस्य शिक्षापद्धत्याः विस्तरेण सह अयं विधि उपेक्षितो जातः ।

अनेन विधिना शिक्षारम्भः उपनयनसंस्कारात्परं भवति स्म। गुरुः छात्रेभ्यो गायत्रीमन्त्रम् उपदिशति। मन्त्रस्यदीक्षात्परं शिक्षा प्रारम्भ्यते। अध्ययनार्थं गुरो आह्वनस्य व्यवस्था आसीत्। प्रतिदिनं शिष्यः नित्यकर्म कृत्वा गुरोः समीपं गच्छति। पाठारम्भाय छात्रः स्वदक्षिणहस्तेन गुरोः वामहस्तमादधाति स्म। निवेदयति स्म यत्-

'सम्माननीयाः श्रावयन्तु ! इति छात्रः दत्तचितो भूत्वा "ओम्" इति शब्दम् उच्चारयति स्म। गुरोः आज्ञां प्राप्य तस्य दक्षिणहस्ततः उपविशति स्म। छात्रः उत्तराभिमुखं भूत्वा आचमनं कृत्वा ब्रह्माञ्जलिम् आबध्य-गुरोः समीपे विद्यां प्राप्नोति स्म। अध्ययानात्पूर्वं पश्चाद् वा चरणस्पर्शे स्वदक्षिणहस्तं गुरोः दक्षिणपादेन स्ववामहस्तं तु गुरोः वामपादेन सह मेलयति स्म। तदानीं चतुर्वर्गस्य अवधारणा प्रचलिता आसीत् । पाठशालाविधौ निम्नलिखिताः शिक्षणविधयः सन्निहिताः आसन्- मौखिक विधिः व्यक्तिगतशिक्षणविधिर्वा सप्तदशशताब्दी पर्यन्तं मुख्यतः अयं विधिः गुरुकुलेषु, पाठशालासु मठेषु प्रचलितः आसीत्। तद् शिक्षणं मौखिकरूपेणैव भवति स्म। वेदमन्त्राणाम् उच्चारणं छात्रैः वारं वारं क्रियते। छात्रकृत उच्चारणसम्बद्धदोषाणां निवारणं शिक्षकेण व्यक्तिगत रूपेण क्रियते स्म। श्रवणस्य, मननस्य, निदिध्यासनस्य प्रक्रि यामपि कण्ठस्थीकरणस्यविशिष्टं स्थानं विद्यते। ते स्वीकुर्वन्ति यत्-

पुस्तकस्था तु या विद्या परहस्तगतं धनम् ।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम् ॥

अर्थात् विद्या तथा अन्यस्य जनस्य हस्ते गतं धनं यदि यथासमये प्राप्तं न भवति तदानीं विद्याधनश्च व्यर्थमेव।

**गुणाः**

- ✓ अनेन विधिना छात्राणाम् उच्चारणं शुद्धं भवति।क।
- ✓ मौखिक अभिव्यक्ति सशक्ता भवति।

३) पारायण विधिः अयं विधिः अपि कण्ठस्थीकरणोपरि बलं ददाति । वैदिकमन्त्राणां सस्वरपाठकरणं पारायणं कथ्यते स्म। नियमानुसारं पारायणकर्तृछात्रः, पारायणिको

भवति। पाठस्य सरलकठिनतायाः च अनुसारेण अनेक प्रकारेण भवति पारायणम्। पाठस्य अनुसारेण पारायणस्य संख्या निर्धारिता भवति।

ग्रंथा- पञ्चकाध्ययनम् (पाठं पञ्चवारं पठनम्) पञ्चवारम् (शब्दान् पञ्चवारं कथनम्) पञ्चरूपम् (पञ्चवारं पठनम्)

उच्चारणसमये अशुद्ध्यनुसारेण छात्राणां परीक्षा अपि भवति स्म।

- एका अशुद्धिः कर्त्तारः छात्रः एकान्यिकः भवति। अशुद्धिद्वयं कर्त्तारः छात्रः द्वैयन्यिकः भवति। गुणः अनेन विधिना प्राप्तज्ञानस्य रक्षणम् आगामिवंशपरम्परायाः कृते भवति स्म।

श्रुति

• **वाद-विवादविधि:** अस्मिन् विधौ कण्ठस्थीकरणेन सह अवबोधने उपरि बलं दीयते स्म। तद् स्थलीय भाषण-प्रदर्शनं भाषण-व्याख्या-सम्यक्-

विभति-विप्रलाप-आदीनां शब्दानां प्रयोग: पाणिनिना कृत:। य: शिष्य: वादविवादे विजयी भवति स्म-स एव तस्य विषयस्य अधिकारी मन्यते स्म। शास्त्रार्थ: संवादश्च अस्य विधे: उदाहरणानि सन्ति।

यथा- यम-यमी संवाद, गार्गी-मैत्रेयी संवादश्च। दार्शनिकतत्वानां शिक्षणं मुख्यत: न्यायशास्त्रस्य अध्यापनं तर्कविधिना प्रचलितम् आसीत्।

**गुणा:-** अनेन छात्राणां भावप्रकाशनस्य शक्ते: विकासो भवति। छात्रेषु स्वाध्यायस्य प्रवृत्ति आयाति।

**• प्रश्नोत्तर विधिः** वैदिककाले शिक्षकः प्रश्नोत्तर विधिना शिक्षणं करोति स्म। प्रति प्रश्नान्तरं छात्रैः तस्यावृत्तिः क्रियन्ते स्म। यदा शिक्षकः सङ्केतमात्रं दीयते तथा छात्राः उत्तरमन्वेष्यन्ति स्म। यतोहि जिज्ञासायाः अभावे ज्ञानं नास्ति अतः वैदिक शिक्षायां प्रश्नानां महत्वं स्वीकृतम् । गुणाः- छात्राः सक्रियाः भवन्ति । छात्राणां चिन्तन-तर्क-निरीक्षणशक्तेश्च विकासो भवति।

• **सूत्र विधिः** विधिः अयं संस्कृतव्याकरणशिक्षणस्य, दर्शनशिक्षणस्य च प्राचीनतमो विधिर्विद्यते। सूत्राणां मुख्यम् उद्देश्यं "घटे समुद्रपूरणम्" आसीत्। अनेन नियमानां सूत्ररूपेण कण्ठस्थीकरणं क्रियते स्म। एतेषां सूत्राणां व्याख्यायाः कृते भाष्यविधेः टीकाविधेश्च अनुसरणं क्रियते स्म। गुणाः क्लिष्ट विषयाणाम् अवगमने स्मरणे च सौविध्यं भवति स्म।

- **कथाकथनविधिः** कथाश्रवणमपि एका कला वर्तते। विषये रुच्युत्पादनाय, विषयस्य स्पष्टीकरणाय च प्राचीनकाले अपि पाठस्य मध्ये मध्ये पञ्चतन्त्र-हितोपदेश सदृशीकथानाम् उदाहरणानि शिक्षकैः दीयन्ते स्म। गुणाः बालकेषु कल्पनाशक्तेः विकासो भवति।

शिक्षणं सरलं सरलञ्च भवति। बालकेषु श्रुत्वा अर्थग्रहणस्य क्षमतोत्पादनं भवति।

**• कक्षानायक विधिः** प्राचीनकाले प्रतिभाशालिनः छात्राः अध्यापनकार्ये गुरोः सहायकाः भवन्ति स्म। यदा आचार्यः अस्वस्थो भवति स्म तदा ते श्रीगुरुकुलस्य छात्रान् पाठयन्ति स्म। गुणाः आत्मविश्वासस्य विकासो भवति स्म। मेधाविछात्राणां ज्ञानं परिपुष्टं भवति स्म।

- **भाषणविधिः** क्लिष्टेषु ग्रन्थेषु ये शब्दाः कठिनाः भवन्ति स्म तेषां शब्दानां स्पष्टीकरणं शिक्षकेण भाषणेन क्रियते स्म। अष्टाध्यायीग्रन्थे प्रयुक्तभाषण-शब्दात् भाषणविधेः आभासो भवति। गुणाः अनेन छात्राः कस्मिन्नपि विषये विस्तृतं ज्ञानं प्राप्नुवन्ति।

• **व्याख्याविधिः** शङ्का समाधानाय शिक्षकेण अस्य विधेः अनुसरणं क्रियते स्म। अस्मिन् विधौ षडङ्गा भवन्ति ।

(1) पदच्छेदः

(2) पदार्थोक्तिः

(3) संशयः

(4) वाक्य योजना

(5) आक्षेपः

(6) समाधानम्।

षडाङ्गैः कस्याऽपि श्लोकस्य व्याख्या सुस्पष्टं भवति ।

गुणाः विषयस्य विस्तृतं ज्ञानं भवति ।

छात्राणां मानसिक क्रियाशीलतायां वृद्धिः जायते ।

**व्याकरणः विधिः** भाषायाः प्राणतत्त्वम् अस्ति 'व्याकरणम्'। व्याकरणं शब्दानुशासनमेव कथ्यते । अस्य शिक्षां विना भाषायाः ज्ञानम् अपूर्ण भवति, अतः भाषाज्ञानाय तस्याः भाषायाः व्याकरणस्य ज्ञानमावश्यकम् अस्ति । प्राचीनसमये वेदाध्यनाय व्याकरणस्य पठनपाठनं विशेषरूपेण भवति स्म। पतञ्जलिना महाभाष्ये लिखितम्- 'रक्षार्थं वेदानाम्, अध्येयं व्याकरणम्'।

**गुणाः** अनेन भाषायाः ध्वनितत्त्वैः छात्राः परिचिताः भवन्ति।
भाषायाः शुद्धलेखनस्य उच्चारणस्य च ज्ञानं भवति।

- पाठशालाविधेः गुणाः
- अभ्यासस्य स्मरणशक्तेश्च अधिकं प्राधान्यं प्रदीयते।
- छात्रेषु अनुशासनभावनायाः विकासः करोति।
- स्वाध्यायस्य अभ्यासो भवति।
- गुरुशिष्ययोर्मध्ये मधुरः सम्बन्धः भवति।
- छात्रेषु मौलिकचिन्तनस्य, तर्कशक्तेः, निरीक्षणशक्तेश्च विकासो भवति।

## पाठशालाविधेः दोषाः

- अयं विधिः नीरसोऽस्ति। यतोहि व्याकरणं प्रधानं भवति।
- भाषायाः अन्यविधाः यथा-गद्य-पद्य कथादयः उपेक्षिताः भवन्ति।
- शिक्षणम् अध्यापकेन्द्रितं भवति।
- अयं विधिः सामान्य-मन्दबुद्धि छात्राणां कृते अनुपयोगी अस्ति।
- छात्राणां सर्वाङ्गीण विकासः न भवति अनेन विधिना।

निष्कर्षतः वयं कथयितुं शक्नुमः यत् व्याकरणस्य ज्ञानाय, भारतीयसंस्कृतेः साहित्यस्य च संरक्षणाय अयं विधि उपयोगी अस्ति।

**व्याकरण - अनुवाद विधिः (भण्डारकर विधिः)** विधिरयं 1835 ईसवीयवर्षे लॉर्डमैकालेमहोदयेन प्रदत्तशिक्षापद्धत्याः अनन्तरं विकासोऽभूत्। "डॉ. रामकृष्णगोपालभण्डारकर महोदयेन पाश्चात्य प्रणालीम् आश्रित्य संस्कृतभाषाम् अध्यापनाय एकः नवीनविधिः आविष्कृतः। तस्यैव नाम्ना विधिरयं भण्डारकरविधिः इति प्रसिद्धिम् अलभत ! तेन व्याकरण- अनुवाद विधिम् आश्रित्य पुस्तकद्वयं विरचितम्

- संस्कृतमन्दिरान्तः प्रवेशिका।
- मार्गोपदेशिका

वामनशिवराम आप्टे महोदयेन "The student's guide to sanskrit composition" इत्यस्यां रचनायाम् अस्य विधेः अनुकरणं कृतम्।

## व्याकरण-अनुवाद विधेः गुणाः

- विधिरयं मनोवैज्ञानिक सिद्धान्तानाम् अनुसरणं करोति ।
- प्रौढानां- स्वयंपाठिछात्राणां पत्राचारपाठ्यक्रमाणां च कृते उपयोगी अस्ति।
- अनेन विधिना आधारितानि पुस्तकानि छात्राणां पथ-प्रदर्शिकानि भवन्ति ।
- विषयाणां सम्यग्रूपेण वर्गीकरणेन अध्ययनकाठिन्यं निवारयति ।

## दोषः

- विधिरयम् उच्चस्तरस्य कृते एव उपयोगी भवति ।
- भाषायाः विविधपक्षाः यथा- उच्चारणाभ्यासः मौखिककार्य, पद्यानां, रसानुभूतिः, गद्यानां मुख्य भावादयः उपेक्षिताः भवन्ति । नग
- केवलं व्याकरणे अनुवादे च बलं दीयते अतः अयं विधि एकाङ्गी अस्ति।

**नवीनविधि:** लॉर्डमैकालेमहोदयस्य शिक्षणपद्धत्याः परं संस्कृतशिक्षणस्य कृते अद्यावधि प्रयुज्यमानाः विधयः अर्वाचीनविधयः (नवीनविधिः) कथ्यन्ते। ते विधयः निम्नलिखिताः सन्ति-

- **पाठ्यपुस्तकविधि:** भारते पाठ्यपुस्तक विधेः समर्थकाः डॉ. वेस्टमहोदयाः आसन् । तेषां मतानुसारं शिक्षणम् ईदृशं स्यात् यत् छात्रः यस्याम् अवस्थायाम् अपि विद्यालयं परित्यजेत् तेन अधीतस्य प्रयोजनं लब्धुं शक्यते। अस्मिन् विधौ कक्षास्तरानुगुणं वर्गीकरणं क्रियते। वर्गीकरणम् इदं वातावरणे आधारितं भवति । पाठ्यपुस्तकेषु वर्णमालायाः आरभ्य पदानि, वाक्यानि, अनुच्छेदाश्च भवन्ति । आदर्शवाचनम्, अनुवाचनं, पाठप्रवर्धनम् अङ्गीकृत्य मौनपाठनं कार्यते।

## गुणाः

- छात्राणां शब्दकोशस्य वृद्धिकरणे सहायको भवति।
- सस्वरवाचनेन छात्रेभ्यः शुद्धोच्चारणभ्यासस्य अवसरः दीयते।
- अवकाशसमये छात्रः पाठान् स्वयमध्येतुं प्रभवति।
- संस्कृतसाहित्यं प्रति अनुरागः प्रादुर्भवति।
- अस्मिन् विधौ शिक्षणसूत्राणाम् अनुसरणं पूर्णरूपेण क्रियते अतः विधिरयं मनोवैज्ञानिकः अस्ति।

## दोषः

- अस्मिन् विधौ छात्राणां ध्यानं केवलं पाठ्यपुस्तक-पर्यन्तमेव सीमितं भवति । ते संस्कृतसाहित्यस्य व्यापकज्ञानाय प्रेरिताः न भवन्ति ।
- छात्राणां शिक्षकाणाञ्च समीक्षात्मकशक्तिः शनैः शनैः लुप्ता भवति। तेषु रटनस्य प्रवृत्ति आयाति ।
- व्याकरणस्य क्रमबद्ध ज्ञानस्य अभावो भवति।

**प्रत्यक्षविधि:** विधिरयं सुगमपद्धति, निर्बाधविधि:, मातृविधिश्च इति नाम्नाऽपि ज्ञायते। सर्वप्रथम आङ्गलभाषाबोधनाय अस्य प्रयोगो दृश्यते। प्रत्यक्षविधे: तात्पर्यम् अस्ति यत् या भाषा अध्यापनीया, सा स्वमाध्यमेनैव बोधनीया।

- अस्मिन् विधौ ध्येया: बिन्दव:
- मौखिक कार्यस्य प्रधानता स्यात् ।
- कामपि भाषां बोधयितुं मातृभाषाया: प्रयोग: न करणीय:।
- पदपदार्थयो: मिथ: साक्षात् सम्बन्धं संस्थाप्य पाठयेत्।

संस्कृतशिक्षणे अस्य विधे: प्रयोग: सर्वप्रथमं प्रो. वी.पी. बोकील-महोदयेन अल्फिन्स्टोननाम्निविद्यालये, मुम्बईनगरेकृत:।

इत्यस्मिन् पुस्तके प्रो. बोकीलमहाभागेन प्रत्यक्षविधेः उपयोगितायाः वर्णनं सम्यग्रूपेण प्रतिपादितम् ।

**गुणाः**

- अयं विधिः भाषाशिक्षणसिद्धान्तानुकूलोऽस्ति ।
- छात्रशिक्षकयोः मध्ये सम्भाषणं प्रचलति अतः ते सक्रियाः भवन्ति।
- श्रवणे-पठने-लेखने-भाषणे च पर्याप्त अवसरः उपलभ्यते ।
- अयं विधिः संस्कृतशिक्षायाः स्तरोन्नयनाय सहायकः भवति।
- छात्रेषु संस्कृतमाध्यमेन स्वतन्त्ररूपेण स्वविचारान् प्रकटयितुं क्षमतायाः विकासः भवति।

## दोषः

- प्राथमिकस्तरे एष अनुपयुक्तो भवति ।
- अनेन विधिना संस्कृतशिक्षणस्य गतिः मन्दा भवति ।
- प्रतिभाशालिनः छात्रः उपकृता भवन्ति न तु सामन्याः मन्दाश्च।
- भाषणकौशलस्य प्राधानान्यात् अन्यभाषाकौशलानाम् उपेक्षा भवति।

विश्लेषणात्मक विधिः संस्कृतशिक्षणे अयं विधिः विशेषतः व्याकरण कथापाठयोः कृते उपयोगी अस्ति। अयं विधिः 'पूर्णात् अंशं प्रति' इति सूत्रम् अनुसृत्य कार्यं करोति । पूर्वं तु पाठस्य सम्पूर्णम् अंशं शिक्षकः बोधयति, ततः परं एकैकम् अंशं गृहीत्वा तस्य विश्लेषणं करोति। यथा - विभिन्नानां पदानां विच्छेदं, समासविग्रहं तदनन्तरं संश्रूषणस्य प्रक्रियाम् अनुसरति ।

## गुणाः

- छात्राः पठनाय प्रेरिताः भवन्ति ।
- शिक्षणसूत्राणाम् अनुकरणेन अयं विधिः मनेवैज्ञानिकः अस्ति ।
- शिक्षणं रुचिकरं, सरलं, सुग्राह्यञ्च भवति ।
- क्लिष्ट पदानाम्, अंशानां, विषयाञ्च स्पष्टीकरणे सहायकः भवति।

## दोषः

- विधिरयम् उच्चस्तराय उपयोगी नास्ति।
- सर्वासां विधानां शिक्षणम् अनेन विधिना न भवितुं शक्यते।